।। অণুভাষ্যম ।।

।। প্রথমোঽধ্যায়ঃ ।।

নাৰায়ণং গুণৈঃ সর্ৱৈৰ্ৱুদীর্ণং দোষৱর্জিতম ।
জ্ঞেয়ং গম্যং গুৰূংশ্চাপি নত্ৱা সূত্রার্থ উচ্যতে ।। ১ ।।

ৱিষ্ণুৰেৱ ৱিজিজ্ঞাস্যঃ সর্ৱকর্তাঽঽগমোদিতঃ ।
সমন্ৱয়াদীক্ষতেশ্চ পূর্ণানংদোঽংতৰঃ খৱত ।। ২ ।।

প্রণেতা জ্যোতিৰিত্যাদ্যৈঃ প্রসিদ্ধৈৰন্যৱস্তুষু ।
উচ্যতে ৱিষ্ণুৰেৱৈকঃ সর্ৱৈঃ সর্ৱগুণত্ৱতঃ ।। ৩ ।।

সর্ৱগোঽত্তা নিয়ংতা চ দৃশ্যত্ৱাদ্যুজ্ঝিতঃ সদা ।
ৱিশ্ৱজীৱাংতৰত্ৱাদ্যৈর্লিংগৈঃ সর্ৱৈর্যুতঃ স হি ।। ৪ ।।

সৰ্ৱাশ্রয়ঃ পূর্ণগুণঃ সোঽক্ষৰঃ সন হৃদব্জগঃ ।
সূর্যাদিভাসকঃ প্রাণপ্রেৰকো দৈৱতৈৰপি ।। ৫ ।।

জ্ঞেয়ো ন ৱেদৈঃ শূদ্রাদ্যৈঃ কংপকোঽন্যশ্চ জীৱতঃ ।
পতিত্ৱাদিগুণৈর্যুক্তস্তদন্যত্র চ ৱাচকৈঃ ।। ৬ ।।

মুখ্যতঃ সর্ৱশব্দৈশ্চ ৱাচ্য একো জনার্দনঃ ।
অৱ্যক্তঃ কর্মৱাক্যৈশ্চ ৱাচ্য একোঽমিতাত্মকঃ ।। ৭ ।।

অৱাংতৰং কাৰণং চ প্ৰকৃতিঃ শূন্যমেৱ চ ।
ইত্যাদ্যন্যত্ৰনিয়তৈৰপি মুখ্যতয়োদিতঃ ।
শব্দৈৰতোঽনংতগুণো যচ্ছব্দা য়োগৱৃত্তয়ঃ ।। ৮ ।।

।। ইতি শ্ৰীমদানংদতীৰ্থভগৱত্পাদাচাৰ্য়ৱিৰচিতে ব্ৰহ্মসূত্ৰাণুভাষ্যে প্ৰথমোঽধ্যায়ঃ ।।

www.yousigma.com